प्रवेश सं० ३९२०४ विषयः पुराणोतिहास क्रम सं० २

नाम सूतसंहिता ग्रन्थकार

पत्र सं० १

श्लोक सं० अक्षर सं० (पंक्तौ) ३२ पंक्ति सं० (पृष्ठे) १०

आकारः x लिपिः दे.ना आधारः का.

वि० विवरणम् अपू. 14329 न.१२ / ११९६(घ)

पी० एस० यू० पी०--७७ एस० सी० ई०--१६४१--५०,०००

Indira Gandhi National Centre for the Arts

॥तत्रैवसूतसंहितायांकूटस्थविवेचनंकृतं॥वृत्तेः साक्षितयावृत्तिप्रागभावस्यच
॥असत्यालंबनत्वेनस
स्थितः॥बुभुक्षायास्तथाऽज्ञोस्मीत्याभासाज्ञानवस्तुनः॥१॥
आनंदरूपः सर्वा
र्थसाधकत्वेनहेतुना॥सर्वसंबंधवत्वेनसंपूर्णः शिवसंज्ञितः॥३॥इति शैवपुरा
णेषुकूटस्थः प्रविवेचितः॥जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः॥४॥अस्या
र्थः॥एवं श्रुतियुक्तिभ्यांकूटस्थंबुध्यादिभ्योविविच्यदर्शयित्वापुराणेष्वपितद्विवे
कःकृतइत्याह॥वृत्तेरित्यादि श्लोकत्रयेण॥कामादिवृत्त्युत्पत्तौसत्यां तस्यसाक्षित्वे
न।वृत्त्युदयात्पूर्वं तत्प्रागभावसाक्षित्वेन। जिज्ञासायांसत्यांतत्साक्षित्वेन। ततःपूर्व
मज्ञोस्मीत्यनुभूयमानाज्ञानसाक्षित्वेनचशिवएवतिष्ठति॥१॥सचअसत्यस्यजग
तआलंबनाधिष्ठानत्वेनसत्यः॥जडस्यसर्वस्यसाधकत्वेनावभासकत्वाच्चिद्रूपः॥२॥
त्यःसर्वजडस्यतु॥साधकत्वेनचिद्रूपः सदाप्रेमास्पदत्वतः॥२॥

Indira Gandhi National
Centre for the Arts

सर्वदाप्रेमविषयत्वादानंदरूपः सर्वार्थविभासकत्वेन॥ सर्वसंबंधित्वात्संपूर्ण इत्युच्य
ते॥ अत्र चेदमभिप्रेतं॥ विमतः शिवो वृत्त्यादिभ्यो भिद्यते वृत्त्यादिसाक्षित्वात् यद्य
द्वृत्त्यादिभ्यो न भिद्यते तत्तद्वृत्त्यादिसाक्षि न भवति यथा वृत्त्यादि॥ विमतः सत्यो भवि
तुमर्हति मिथ्याऽधिष्ठानत्वात् असत्यरजताधिष्ठानशुक्तिवत्॥ विमतश्चिद्रूपः जडमा
त्रावभासकत्वात् यच्चिद्रूपं न भवति तत्सर्वजडावभासकमपि न भवति यथा घटा
दिः॥ विमतः। परमानंदरूपः परप्रेमास्पदत्वात् यत्परमानंदरूपं न भवति तत्परप्रे
मास्पदमपि न भवति यथा घटादिः॥ विमतः। परिपूर्णः सर्वसंबंधित्वात् गगनवत् स
र्वसंबंधित्वं च सर्वार्थसाधकत्वेन॥ विमतः। सर्वसंबंधवान् सर्वविभासकत्वात् यः
सर्वसंबंधवान्न भवति स सर्वविभासकोपि न भवति यथा दीपादिरिति॥ उदाहृतपुरा
णवाक्यस्य तात्पर्यमाह॥ इतीति॥ इत्येवंप्रकारेण सूतसंहितादिषु पुराणेषु जीवेशत्वा
दिकल्पनारहितः केवलोऽद्वितीयः स्वप्रभः स्वयंप्रकाशश्चैतन्यरूपः शिवः कूट
स्थो